वाचोऽर्थलक्षणम् ।' इति । अनेन पदेष्विव वाक्येष्वपीश्वरसमय इति स्पष्ट मेवोक्तम्, तस्मादितरेतराध्यासः तन्मूलकं तन्मूलकं तादात्म्यञ्च सम्बन्ध इति सङ्घातार्थः । उक्तञ्चापि पातञ्जले भाष्ये—'सङ्केतस्तु पदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः योऽर्थः सः शब्दः' इति । स्मृत्यात्मक इति पदेन ज्ञातस्यैव सङ्केतस्य शक्तिबोधकत्वं दर्शितम् ।

( ४ ) प्रश्नः—नैयायिकाभिमतस्येश्वरसङ्केतस्य शक्तित्वं परमलघुमञ्जूषादिशा निरसयत ।

उत्तरम्—नैयायिकाः ईश्वरसङ्केतरूपां शक्तिं स्वीकुर्वन्ति । तन्नोचितम् 'अयमेतच्छक्यः' 'अयमस्य शक्तिः' इत्यस्य सङ्केतस्य शक्तितः पार्थक्येन प्रसिद्धत्वात् । उक्तञ्चापि न्यायवाचस्पत्ये—'स्वर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः सङ्केतः तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्सङ्केतः ।' इति ।

तस्य च तादात्म्यस्य निरूपकत्वेन विवक्षितोऽर्थः शक्यः । आश्रयत्वेन विवक्षितः शब्दः शक्त इत्युच्यते । शब्दार्थयोः तादात्म्यादेव श्लोकमशृणोदयार्थमशृणोदिति अर्थं वदति, इत्यादिव्यवहारः । 'ओमित्येकाक्षरं ब्रह्म ।' 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः ।' 'वृद्धिरादैच्' इति शक्तिग्राहकश्रुतिस्मृतिविषये सामानाधिकरण्येन प्रयोगश्च ।

तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमिति भेदाभेदसमनियतम् । अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः ।

यत्तु तार्किकैः—शब्दार्थयोस्तादात्म्यस्वीकारे सति मधुशब्दोच्चारणे सति मुखे माधुर्यरसास्वादापत्तिः, वह्निशब्दोच्चारणे च सति मुखे दाहापत्तिः स्यात् । तन्न, शब्दार्थयोर्भेदाभेदस्योपपादितत्वात् । तयोर्भेद एव अभेदस्त्वारोपितः इति भावः ।

वस्तुतो बौद्ध एवार्थः शक्यः, पदमपि स्फोटात्मकं प्रसिद्धम्, तयोस्तादात्म्यम् । तत्र बौद्धैः वह्न्यादावर्थे दाहादिशक्तिमत्त्वाभावात् । अत एव 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति विकल्पसूत्रं सङ्गच्छते । शब्दज्ञानमार्गेणानुपाती बुद्धावनुपतनशालो वस्तुशून्यो बाह्यार्थरहितो विशेषेण कल्प्यत इति विकल्पः, बुद्धिपरिकल्पित इति तदर्थः ।

अत एव—'एष बन्ध्यासुतो याति खपुष्पकृतशेखरः ।
कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः ॥'